# संस्कृतवार्ताः

**दिनाङ्क :-11.03.2026**

**प्रातः - 06:55**

**पीएम-केरलम्**

प्रधानमन्त्री नरेन्द्रमोदी अद्य केरलं तमिलनाडुं च गमिष्यति। केरल-राज्ये अद्य अपराह्णे प्रधानमन्त्री एर्नाकुलम्-नगरे प्रायशः अष्टशतधिक-दशसहस्र कोटि-रूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनम्, शिलान्यासं च करिष्यति। अस्मिन् कार्यक्रमे प्रधानमंत्री मोदी एकं जनसम्मेलनं अपि सम्बोधयिष्यति। तमिलनाडुराज्ये प्रधानमन्त्री तिरुचिरापल्ल्यां प्रायशः सार्धषड्शतधिक-पञ्चसहस्र कोटिरूप्यकाणां परियोजनानां उद्घाटनम् करिष्यति। परियोजनायां पेट्रोलियम-प्राकृतिकवाय्वेंधन-आधारित-अवसंरचना, ग्रामीण-सम्पर्कः, राजमार्ग-विकासः इत्यादीनि प्रमुखानि क्षेत्राणि अन्तर्भवन्ति। प्रधानमन्त्री पञ्च नूतनानि रेलयानसेवायाः ध्वजारोहणं कृत्वा अस्मिन् अवसरे जनसमूहं अपि सम्बोधयिष्यति।

**केन्द्रीयमन्त्रिमण्डल**

प्रधानमन्त्री नरेन्द्र मोदीनः अध्यक्षतायां केन्द्रीयमन्त्रिमण्डलेन जलजीवन-मिशन् इत्यस्य विस्ताराय अष्टविंशत्यधिक-द्विसहस्रतम वर्षस्य दिसम्बर-मास-पर्यन्तं प्रायः अष्ट-दशमलव सप्त शून्य लक्षं कोटिरूप्यकाणां वर्धितव्ययस्य अनुमतिः प्रदत्ता। नवदिल्ली-नगरे वार्ताहरेण सह वार्तालापं कुर्वन् सूचना-प्रसारण-मंत्री अश्विनी-वैष्णवः अवदत् यत्, जलजीवन-मिशन इत्यस्य अवसंरचना-निर्माणात् सेवा-वितरणपर्यन्तं कार्यान्वयनस्य पुनर्रचनस्य पुनर्निर्धारणस्य च जलशक्ति-मन्त्रालयस्य प्रस्तावं मन्त्रिमण्डलेन अनुमोदितम्। तेनोक्तम् यत् केन्द्रीयमन्त्रिमण्डलेन देशेन सह स्थलसीमा-सम्बद्धानां देशानां निवेशविषये दिशानिर्देशेषु परिवर्तनं स्वीकृतम्, येन वैश्विकनिधिः स्टार्ट-अप् तथा डीप्-टेक् क्षेत्रेषु अधिकाधिकं विदेशीयनिवेशः आकर्षितं करिष्यति इति। तमिलनाडुराज्यस्य मदुरै-विमानस्थानकं अन्ताराष्ट्रियविमानस्थानकत्वेन घोषयितुं प्रस्तावः अपि स्वीकृतम्। आर्थिकप्रकरणाय केन्द्रीयमंत्रिमण्डलसमितिः दिल्ली-मुम्बई-द्रुतमार्गस्य दिल्ली-फरीदाबाद-बल्लभगढ-सोहना इत्यतः गम्यमानस्य उत्तरप्रदेशस्य गौतमबुद्धनगर-

मण्डलस्य जेवर-अन्ताराष्ट्रिय-विमानस्थानकं प्रति ग्रीन्फील्ड्-मार्ग-सम्पर्कस्य निर्माणाय त्रिंशदधिक-षड्शताधिक-त्रिसहस्र दशमलव सप्त सप्त कोटिरूप्यकाणां संशोधित-कुल-पूँजी-व्ययं अपि स्वीकृतवती।

## पश्चिम-बङ्ग

आगामिषु पश्चिमबङ्गालविधानसभानिर्वाचनेषु सर्वे वैधानि मतदाताः मताधिकारस्य प्रयोगं कर्तुं शक्नुवन्ति, परन्तु एकमपि अवैधं मतदाता नाम मतदाता-सूच्यां सम्मिलितं न भविष्यति। मुख्य-निर्वाचन-आयुक्तः ज्ञानेश-कुमारः ह्यः कोलकातानगरे वार्ताहरान् सम्बोधयन् एतत् उक्तवान्। निर्वाचन-आयोगस्य पूर्णपीठस्य द्विवार्षिकयात्रायाः अनन्तरं मुख्य-निर्वाचन-आयुक्तः वार्ताहरान् प्रति अवदत् यत् जन-प्रतिनिधित्व-अधिनियमेन 1950 इत्यनेनैव एस. ऐ. आर. इति प्रक्रिया कृता अस्ति इति।

## प्राकृतिकवाय्वेंधन

सर्वकारेण आश्वासनं प्रदत्तम् यत् देशे गृहस्थ-ग्राहकेभ्यः ऊर्जायाः अभावः नास्ति, चिंतायाः कारणमपि नास्ति। सर्वकारेण उक्तम् यत्, देशस्य गृहस्थग्राहकेभ्यः सुलभ-ऊर्जायाः अविरामपूर्तिं सुनिश्चितुं प्रतिबद्धः अस्ति। सामाजिक-संचार-माध्यमेन, पेट्रोलियम-प्राकृतिकवाय्वेंधन-मन्त्रिणः हर्दीप सिङ्घ-पुरी-वर्यः उल्लेखितवान् यत् भारतस्य ऊर्जा-आयातः विभिन्नस्रोतः मार्गेभ्यः च निरन्तरं आगच्छति इति। अत्रान्तरे, तैल-निगमाः देशे एल्. पि. जि. उत्पादनं वर्धितवन्तः।

## विदेशमन्त्री एस. जयशङ्करः

गतदिवसे विदेशमन्त्री डॉ. एस. जयशङ्करः ईरान देशस्य विदेशमन्त्री सैयद् अब्बास् अराघ्ची इत्यनेन सह सायंकाले पश्चिम-एशियादेशे वर्तमानस्य द्वन्द्वस्य नवीनतमविकासविषये विस्तृतं वार्तालापं कृतवान्। गतमासे ईरान-अमेरिका-इस्रेल्-संयुक्तसैन्यानां मध्ये द्वन्द्वस्य आरम्भात् परं एतत् तेषां तृतीयं दूरभाष-वार्तालापम् आसीत्। डॉ. जयशङ्करः स्वस्य जर्मन-समकक्षीयेन जोहान वाडेफुल इत्यनेन सह अथ दक्षिणकोरिया-देशस्य विदेशमन्त्रिणा चो ह्युन् इत्यनेन सह अपि वार्तालापं कृत्वा पश्चिम-एशियायाः स्थितिं चर्चितवान्।